International Journal of Sanskrit Research 2021; 7(4): 114-116

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(4): 114-116
© 2021 IJSR
www.anantaajournal.com
Received: 03-05-2021
Accepted: 19-06-2021

डॉ. श्रद्धाञ्जलिमहापात्र
सहायकाचार्या,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः, पुरी,
ओड़िशा, भारत

**Corresponding Author:**
डॉ. श्रद्धाञ्जलिमहापात्र
सहायकाचार्या,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः, पुरी,
ओड़िशा, भारत

# उपनिषत्सु आत्मरहस्यम्

डॉ. श्रद्धाञ्जलिमहापात्र

प्रस्तावना:

संसारोऽयं अतीव विचित्र। अत्र नित्य जराब्याधि दुःख मृत्यु परिदृश्यते। अतः अस्मात् संसारात् नित्यनिवृतिः परमसुखस्य मार्गमित्यत्र नास्ति संशयः। नित्यनिवृतिस्तु आत्मज्ञानेन एव सम्भवति आत्मनः नित्य सुखस्वरूपत्वात्। सैव आत्मज्ञानं तत्वमस्यादि महावाक्यजन्य श्रवण-मनन-निदिध्यासनादिभिः एव भविष्यति। ततः जायते अहं ब्रह्मास्मिबोधः। तदा प्राप्यते नित्यसुखस्य स्वरूपं जन्मजन्मान्तरीय संसारचक्रात् नित्यनिवृतिः।

परिदृश्यात्मकस्य विचित्ररचनारूपस्य विवर्तरूपस्य प्रपञ्चस्य प्रकाशकोऽस्ति आत्मा। आत्मनः स्वप्रकाशत्वात्, चिन्मात्रस्वरूपत्वात्, सत्यत्वान्, नित्यत्वात्, आनन्दस्वरूपत्वाद्, शुद्धत्वात्, बुद्धत्वात्, अनादि-अननन्तस्वरूपत्वात्। भूतभौतिकपदार्थेषु सूर्य यथा सकल जगत् प्रकाशकरूपेण स्वसत्ता उपस्थाप्यते तद्वदेव आत्मा सकलप्रपञ्चस्य प्रकाशकत्वेन स्वस्वरूपं प्रतिपाद्यते, समग्रस्य प्रपञ्चस्य प्रकाशकत्वेऽपि चक्षुरिन्द्रियैः अग्राह्य अतिसूक्ष्मत्वात्। तथापि उच्यते सर्वगतत्वात् आकाशवत्सर्वगतश्च नित्यम्। सर्वस्य स्थावरजङ्गमस्य प्रकाशकत्वेऽपि आत्मा वाणी मनसः अगोचर, तस्मादुच्यते यतोवाचो निवर्तन्ते अप्राप्यमनसासह, सर्वेभ्यः भूत भौतिकेभ्यः वेगवत्तर भवति आत्मा अनिन्द्रिय ग्राह्यत्वेऽपि सर्वव्यापकत्वाद्। अतिसूक्ष्मत्वात् मनसः विचक्षण गति वर्तते भूतभौतिकेषु। देवर्षिनारदोऽपि मनयानेन क्षणेमात्रे सर्वत्र परिभ्रमन्ति। किन्तु आत्मा ततोऽपि वेगवत्तर सर्वगतत्वात्। अक्तं च ईशोपनिषदि :-

अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन् पूर्वमर्षत्
तद्धावतोऽन्यानत्येति तिष्ठन्

तस्मिन्नपो मातरिश्वादधाति [1] ।

जीव स्वात्मस्वरूपज्ञानं नैव ज्ञातुं पारयति अज्ञानस्य आवरण विक्षेपशक्तिवशात्। उच्यते श्रीमद्भगवद्गीतायाम् –

अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः [2]।

सर्वेषु ज्ञानेषु आत्मज्ञानस्य सारत्वं उच्यते उपनिषदि। स्वात्मज्ञानं प्राप्तः सन् यः आस्मात् संसारात् तरति तस्य जन्ममजन्मान्तरीय संसार चक्रात् निवृत्तिः भवति, यदि कोऽपि न जानाति भूयः भूयः संसारचक्रे निपतति। भवति महति विनष्टि। विनष्टि नाम विनाशनं जन्मजरामरणादिप्रवन्धाविच्छेदलक्षणा संसारगतिः [3] तस्मादुच्यते केनोपनिषदि –

इहचेदवेदीदथ सत्यमस्ति न येदिहावेदीन्महती विनष्टिः।
भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृताभवन्ति [4] ।।

आत्मज्ञानप्राप्त्यर्थं श्रद्धायाः अस्ति आवश्यकता। महर्षि याज्ञवल्क्यस्य श्रद्धा आसीत्। श्रद्धा आसीत् राजर्षि जनकस्य, श्रद्धा आसीत् श्वेतकेतोः श्रद्धा आसीत् नचिकेतसः "श्रद्धावान् लभते ज्ञानं" इति उक्तेः। स आत्मा अणोरणीयान् महतो महीयान्। कोऽपि चिन्तयति हतोऽहं कोऽपि चिन्तयति हन्तारं अहं किन्तु सैव आत्मतत्व "नायहन्ति न हन्यते"। यदि कोऽपि विशुद्ध मनसा आत्मजिज्ञासा कर्तुं प्रभवति आत्मज्ञानं तस्य अवश्यं भवति आत्मा आत्मकृपासाध्यत्वात्।

बालक नचिकेतायाः यमस्य तृतीयवररूपेण आत्मरहस्य आत्मज्ञानप्राप्ति अवश्य अस्य प्रकृष्टोदाहरणम्। यम नचिकेतं प्रलोभितं नैव कर्तुं शक्नोति स्म। एषणा त्रय त्याग पूर्वकं नचिकेता यमं प्रति आत्मज्ञानं याचितवान्। यमराजमुखात् आत्मज्ञानं प्राप्य नचिकेता स्वात्मानन्दं अनुभूतवान्। यमराजस्य अयमुपदेशः आसीत् आत्मस्वरूपनिरूपणावसरे –

न जायते म्रियते वा विपश्चित्
नायं कुतश्चित् न वभूवकश्चित्।
अजो नित्य शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे।।

अनिन्द्रियग्राह्यत्वेऽपि आत्मा सूक्ष्मबुद्धिग्राह्य। उक्तं च श्रीमद्भगवद्गीतायां नाहं प्रकाश सर्वस्य योगमायासमावृतः अति सूक्ष्मबुद्धिग्राह्यत्वात् सर्वेषु भूतेषु गुढोऽत्मा न प्रकाशते। सूक्ष्मबुद्ध्या पुरूषस्यपचिन्तननेन आत्मा उपलब्धि भवति। उच्यते –

एष सर्वेषु भूतेषु गुढात्मा न प्रकाशते।
दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शोभिः।

केचन जीवात्मा परमात्मनोर्मध्ये अपि भेदबुद्धिं जनयन्ति। जीवात्मा परमात्मा अनयोर्मध्ये नास्ति कश्चन भेदः। उच्यते गौडपादकारिकायां माण्डुक्योपनिषदि –

जीवात्मनो रनन्यत्वमभेदेन प्रशस्यते।
नानात्वं निन्द्यते यश्च तदेव हि समञ्जसम् [5] ।

तथाच शाङ्करभाष्ये यच्च सर्वप्राणिसाधारणं स्वाभाविकं शास्त्रवहिष्कृतेः कुतार्किकैर्विरचितं नानात्वदर्शनं निन्द्यते "न तु तद्वितीयमस्ति

1. ई.उ. - ४
2. भ.गी. - ५.१५
3. के.उ.शा.भा. २-५
4. के. - २-५
5. मा.उ. - अ.प्र. - १३

द्वितीयाद्वैभयं भवति इदं सर्वं यदयमात्मा। मृत्योः स मृत्युमाप्नोति य इह नान्येव पश्यति"। इत्यादिवाक्यैश्चान्यैश्च ब्रह्मविद्भिः।
श्रुत्युक्त जीवभेदः गोणत्वात् उक्तं च गौडपादेन –

जीवात्मनोः पृथकत्वं यत्प्रागुत्पतेः प्रकीर्तितम्।
भबिष्यद्वृत्या गौणं तन्मुख्यत्वं हि न युज्यते [6] ।।

सैव आत्मज्ञानेन शोकनिवृत्तिपूर्वक सकल संसारोच्छेदो भवति। ब्रह्मादि स्तम्बपर्यन्तस्य प्राणिजातस्य गुहायां हृदयं निहितं आत्मभूतः स्थित आत्मा। उच्यते श्वेताश्वेतरे –

अणोरणीयान् महतो महीयान्।
आत्मा गुहायां निहितोऽस्य जन्तोः [7]।।

आत्मस्वरूपस्य अनुभव ब्रह्मवेता ऋषिणां भवति। कथं तमनुभवः इत्युक्ते उच्यते शाङ्करभाष्ये वेदाहमिति। वेद जानोऽहमेतमजरं विपरिणामधर्मवर्जितं पुराणं पुरातनं सर्वात्मानं सर्वेषामात्मभूतं सर्वगतं विभूत्वादाकाशवद्व्यापकत्वात्, यस्य च जन्म निरोध मुत्पत्यभावं प्रवदन्ति ब्रह्मवादिनो हि नित्यम्। तथा च श्रुतिः – वेदाहमेतमजरं पुराणम् -

सर्वात्मानं सर्वगतं विभूत्वात्
जन्मनिरोधं प्रवदन्ति यस्य
ब्रह्मवादिनो हि प्रवदन्ति नित्यम् [8] ।।

आत्मतृप्तमानव आत्मरति आत्मक्रीडा कृत्वा आत्मना एव सर्वदा निमज्जित भवति। तदुक्तं गीताशास्त्रे –

यस्त्वात्मरतिरेव स्यात् आत्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते।।

अर्थात् नान्य कश्चित् विषयेषु अपितु आत्मनि एवरति आत्मरतिः। नान्य अन्नरसादिना सन्तुष्टः अपितु आत्मनि एव सन्तुष्टः। सर्वतो वाह्यार्थलाभेवीतस्वृहसन् आत्मनि एव यः सन्तुष्टः इद्दश आत्मवित् कृते न किमपि अन्य करणीयः। तस्मात् आत्मज्ञानं सर्वेषु ज्ञानेषु श्रेष्ठः इति।
अतः सङ्गरहितत्वात् असङ्गः, जाड्यरहितत्वात् चैतन्यम्। अवयवरहितत्वात् निरवयवः, रूपरहितत्वात् निरूपम्, सकलदुःख अभावरूपत्वात् सदानन्दः निरतिशयसुखस्वरूपमस्ति आत्मनः स्वरूपम्।

सन्दर्भः

1. ईशादि नौ उपनिषद (शाङ्करभाष्य)-गीताप्रेस गोरखपुर
2. श्रीमद्भगवद्गीता (शाङ्करभाष्य)-गीताप्रेस गोरखपुर
3. माण्डुक्योपनिषद् गौडपादकारिका-गीताप्रेस गोरखपुर
4. श्वेताश्वेतरोपनिषद् (शाङ्करभाष्य)-गीताप्रेस गोरखपुर
5. ईशोपनिषद् (शाङ्करभाष्य)-गीताप्रेस गोरखपुर
6. केनोपनिषद् (शाङ्करभाष्य)-गीताप्रेस गोरखपुर

6. मा.उ. अ.प्र. - १४
7. श्वे. उ. - ३.२०
8. श्वे. उ. - ३.२१